# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ८ | गुणाः - ७० |
| विषयः - साहित्यम् | (C.E.- ३.५.१० Old ) | समयः -३.०० तः ६.०० |
| दिनाङ्कः - १७/१०/२०१९ | सन्दर्भग्रन्थः - कादम्बरी | |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नेषु द्वयोः सप्रसङ्गं व्याख्यां कुरुत ।** **१०**

(१) गौरीमनःशुद्धिमिव कृतदेहपरिग्रहाम्, कार्त्तिकेयकौमार व्रतक्रियामिवमूर्तिमतीम्, गिरीशवृषभदेहद्युतिमिव पृथगवस्थिताम्, आयतनतरुकुसुमसमृद्धिमिव शङ्कराभ्यर्चनाय स्वयमुधाताम्

(२) तद् यदि मे सहसा दर्शनपथान्नापयाति, नारोहति वा कैलासशिखरम्,नोत्पतति वा गगनतलम्, ततः का त्वम्,किमभिधाना वा, किमर्थं वा प्रथमे वयसि प्रतिपन्ना व्रतम् इति सर्वमेवैतत् एनामुपसृत्य पृच्छामि ।

(३) उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन, पृष्ठतः प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नमात्मानम् अधारयम् । अनन्तरञ्च मेऽन्तर्मदनेन अवकाशमिव दातुमाहितसन्ताना निरीयुः श्वासमरुतः ॥

**प्रश्नः २** बाणभट्टस्य परिचयं लिखत । **१०**

**अथवा**

गद्यसाहित्यस्य परिचयं लिखत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नेषु द्वयोः सप्रसङ्गं व्याख्यां कुरुत ।** **१०**

(१) अस्ति त्रिभुवनप्रख्यातकीर्तिरत्युदारतयासुरासुरसिद्धवृन्दवन्दितचारणयुगलो महामुनि-र्दिव्यलोकनिवासी श्वेतकेतुर्नाम । तस्य च भगवतः सुरलोकसुन्दरीहृदयानन्दकरम्, अशेषत्रिभुवनसुन्दरम् अतिशयितनलकूबरं रूपमासीत् ।

(२) भर्तृदारिके ! यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तुर्दुहितुरियं कर्णावतंसीकृता सुरतरुमञ्जरी, स तस्माद् द्वितीयादात्मनो रक्षन् दर्शनमतिनिभृतपदः कुसुमितलतासन्तानगहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतो भर्तृदारिकमुद्दिश्याप्राक्षीत् ।

(३) एकमुक्तश्च मया कपिञ्जलः प्रत्यवादीत् राजपुत्रि । किं ब्रवीमि । वागेव मे नाभिधेयविषयभवतरति त्रपया । क्व कन्दमूलाशी शान्तो वननिरतो मुनिजनः ? क्व वायमनुपशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलाससङ्कटो रागप्रायः प्रपञ्चः ।

**प्रश्नः ४** महाश्वेताया विरहावस्थां वर्णयत । **१०**

**अथवा**

महाश्वेतादर्शने पुण्डरीकदशावर्णनं कुरुत ।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नेषु द्वयोः सप्रसङ्गं व्याख्यां कुरुत । १०**

(१) भोः कठिनहृदये ! दर्शनमात्रकेणापि न पुनरनुगृहीतोऽयमनुगतो जनः इति सप्रणयं मामुपलभमानमिव चक्षुषा किञ्चिद्विवृताधरतया जीवितमपहर्तुमन्तःप्रविष्टैरिवेन्दुकिरणै र्निर्गच्छद्भिर्दशनांशुभिर्धवलितपुरोभागम् ।

(२) भगवति ! मया पापेन तवायं पुनरभिनवतां नीतः शोकः, येनेदृशीं दशामुपनीताऽसि । तदलमनया कथया । सह्रियतामियम् । अहमप्यसमर्थः श्रोतुम् । अतिक्रान्तान्यपि हि सङ्कीर्त्यमानानि प्रियजनविश्वासवचनान्यनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखानि ।

(३) असौ तु ससम्भ्रममदत्त्वैवोत्तरमुदतिष्ठत् —दुरात्मन् ! क्व मे वयस्यमपहृत्य गच्छसि इत्यभिधायोन्मुखः सञ्जातकोपो बध्नन् सावेगम् उत्तरीयवल्कलेन परिकरम्, उत्पत्योत्पतन्तं तमेवानुसरन्नन्तरिक्षमुदगात् । पश्यन्त्या एव च मे सर्व एव तारागणमध्यविशन् ।

**प्रश्नः ६** महाश्वेताया विलापवर्णनं कुरुत । **१०**

**अथवा**

पुण्डरीकदेहस्य गगने नयनं वर्णयत ।

## संयुक्तान्वितिः

**प्रश्नः ७ निम्नेषु दशप्रश्नानां लघूत्तराणि लिखत । १०**

(१) कादम्बरी केन रचिता ?

(२) कादम्बर्यां नायिका का ?

(३) कादम्बर्यां नायकः कः ?

(४) गद्यं केषां निकषं वदन्ति ?

(५) गद्यसाहित्ये केनोच्छिष्टं जगत् ?

(६) पुण्डरीकस्य पितुः नाम किम् ?

(७) पुण्डरीकस्य मातुः नाम किम् ?

(८) पुण्डरीकस्य सखा कः अस्ति ?

(९) पुण्डरीकेण कस्य मञ्जरी धृता आसीत् ?

(१०) साधवः किंधना भवन्ति ?

(११) तरलिका का अस्ति ?

(१२) महाश्वेतायाः पितुः नाम किम् ?

(१३) महाश्वेतायाः मातुः नाम किम् ?

(१४) कीदृशं यौवनं दुर्लभं भवति ?

(१५) पुण्डरीकस्य देहं गगने कः अनयत् ?

----oooo----